विषये चास्य भुज्यते भक्तं तद्व्यवहारेण भोक्ता तद्द्रव्य-मर्हति" कात्या०। [भ्रान्तं प्रत्यक्षं निर्विकल्पकम्" स०द०।

**अपोढ** त्रि० अप–वह–क्त। १ निरस्ते त्यक्ते २ "कल्पनापोढम-

**अपोदक** त्रि० अपगतमुदकं सुश्लिष्टत्वात् यस्य। १ अप्र-विष्टोदके "तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोद-काभिः" ऋ०१,११६,३। अपनद्धं फलेषूदकं यस्याः उक्त-पुंस्कत्वात् स्त्रियामत इत्त्वं वा। इत्त्वपक्षेऽपोदिकापि (पुइ) पूतिकायाम् तत्फलेषु उदकाभावात्तथात्वम्। अप-कृष्टमुदकं यस्मात् ५ब०। जलापकर्षहेतौ विषादौ "यत अपोदकं विषं तत्त एतास्वग्रभवम्" अथ० ५,१३,१।

**अपोनप्त्रि(प्त्री)य** त्रि० अपोनपात् देवताऽस्य घ–छ वा नि०। अपोनपाद्देवताके हविरादौ। [मयट्। जलमये।

**अपोमय** त्रि० अपः जलं तदात्मकं तद्विकारत्वात् अपस्+

**अपोह** पु० अप+ऊह गत्यादौ बा० भावे क। १ त्यागे २ अतद्व्यावृत्तौ तद्भिन्नस्य व्यावृत्तेरपि त्यागविशेषरूपत्वा-त्तथात्वम्। "तद्वानपोहो वा शब्दार्थः" इति काव्यप्र० "अपोहः अतद्व्यावृत्तिरिति" महेश्वरः। ऊहस्तर्कः अपः विपरीतो प्रा०स०। अपरतर्कनिरासाय कृते विपरीततर्के ३ च "शुश्रूषा श्रवणं चैव ग्रहणं धारणा तथा। ऊहो-ऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा" इति हेमचन्द्रोक्तः बुद्धिगुणभेदः। "स्वयमूहापोहासमर्थः" इति पा०भा०। भावे ल्युट्। अपोहनमप्यत्र न०। "मत्तः स्मृतिर्ज्ञान-मपोहनञ्चेति" गीता।

**अपोहनीय** त्रि० अप–ऊह–अनीयर्। अपरकृततर्कनिर-सनेन तर्कणीये, "ऋत्विगपोहनीयास्त्रयः" कात्या० २२,६,२१।

**अपोह्य** त्रि० अप–ऊह गत्यादौ कर्मणि ण्यत्। अपगमनीये "त्याज्ये एतैर्त्रैरपोह्यं स्यादेनोहिंसासमुद्भवम्" मनुः अप+वह–ल्यप्। दूरीकृत्येत्यर्थे अव्य०।

**अपौरुष** त्रि० नास्ति पौरुषमस्य। विक्रमशून्ये। अभावे न०त०। पौरुषाभावे न०।

**अप्चर** त्रि० अप्सु चरति चर–ट। १ जलचरे जन्तौ स्त्रियां ङीप् "तीरण्याद्यान्याश्रितास्तेषां स्वगगर्ताश्रयाप्-चराः" इति मनुः त्रीणि दुर्गाणि।

**अप्तु** न० आप्यते भोगाय जीवेन आप–तुन् ह्रस्वश्च। १शरीरे २ सूक्ष्मरूपसोमे च। "अथाप्तवे द्वितीये यामाहुतिं जु-होति शत०ब्रा०३,६,२८, अप्तुः सूक्ष्मरूपः सोमः भा०।

**अप्तुर्** पु० अप्तुरः जलदानाय त्वरते त्वर–वेगे क्विप्। जल-दायके इन्द्रे तस्य मेघनायकत्वेन तत्प्रेरकतया जलदा-तृत्वात्तथात्वम् "यज्ञेन गातुमप्तुरो विविद्रिरे" ऋ०२,२१,५, "अप्तुरः अपां प्रेरकादिन्द्रात्" भा०। २तद्दायकेऽनलादौ च तत्वाग्न्यादेः "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिरिति" मनूक्तेः जलप्रेरकत्वम्।

**अप्तुर्य्य** न० अप्तुरो भावः बा० वेदे यत्। "जलप्रेर-कत्वे लोके तु ष्यञ् आप्तुर्य्यमित्येव। "इन्द्राग्नी! तवि-षाणि वां सधस्थानि प्रयांसि च युवोरप्तुर्य्यं हितम्" १२,८, अप्तुर्य्यं वृष्टिप्रेरकत्वम् भा०युवोर्युवयोरिन्द्राग्न्योः

**अप्तोर्याम** पु० अप्तोर्देहस्य यापकत्वाद्याम इव अलु०स०। अग्निष्टोमाङ्गयागभेदे "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या अग्निष्टोमस्य देहव्यापककालकत्वात्तथात्वम्। "सो-ऽप्तोर्यामेण यजेत" कात्या० ६,११,१०, "षडुत्तरे अत्यग्नि-ष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामः कात्या० १०,६,२६,।

**अप्त्य** त्रि० अप्तुनि देहे भवः यत् वेदे टिलोपः। १अप्तव्ये निरु० २देहकर्म्मणि स्थिते च "पूर्व्ये अर्द्धे रजसो अप्त्यस्य" ऋ०१,१२४,५ "अप्त्यस्य कर्मणि स्थितस्येति" भा०

**अप्नःस्थ** त्रि० अप्नसि कर्मणि तिष्ठति अधिकृतत्वात् स्था–क ७त०। १ कर्मण्यधिकृते "संयावप्नःस्थो अपसेव" ऋ० ६, ६७,३। "अप्नःस्थः कर्मण्यधिकृतः" भा०।

**अप्नराज** पु० अप्नसां कर्मणां राजा प्रेरकत्वात् टच् समा० वेदे पृ० सलोपः। कर्म्मप्रेरके। "युवं ह्यप्नराजावसी-दतम्" ऋ० १०१३२७।

**अप्नवान** पु०अप्नसा कर्म्मणा वानं गतिः सन्ततिरस्य। भृगुवंश्ये, ऋषिभेदे, "यमप्नवानो भृगवो विरुरुचुः" ऋ०४,७,१, अप्न-वानः भृगुसम्बन्धी कश्चिदृषिः, भा०। "और्वभृगुवदप्न-वानवदाहुवे अग्निं समुद्रसम्" ऋ०८,१०२,४, अस्यैव वत्सादिगोत्रप्रवरत्वम् "वत्सानां भार्गवच्यवनाप्नवानौर्व्व-जामदग्न्याः" इति "भार्गवौर्वजामदग्न्याः" इति वा "भार्गवच्यवनाप्नवानाः" इति वा "वेदानां पञ्च, भार्गवच्य-वनाप्नवानौर्वविदाः" इति गोत्रप्रवरा०। बहूनामाप्नुवतः प्रवरत्वकल्पनं प्रवराध्यायविरुद्धत्वाद्धेयम्। अप्नसे आ-दानकर्मणे वानमस्य पृ० सलोपः। बाह्वौ निरु०।

**अप्नस्** त्रि० आप–असुन् नुट् ह्रस्वश्च। १ कर्म्मणि निरु०। "क्रियातो विभागः विभागात् पूर्व्वदेशसंयोगनाशस्तत उत्तरदेशसंयोग" इत्युक्तेः संयोगहेतुत्वात्तथात्वम् "तद्देवेषु चकृषे भद्रमप्नः" ऋ० १,११३,६। "अप्नः कर्म" भा०।